# Prajapatibhih Kritam Mahadeva Stotram

# પ્રજાપતિભિઃ કૃતં મહાદેવસ્તોત્રમ્

## Document Information

Text title : Prajapatibhih Kritam Mahadeva Stotram

File name : prajApatibhiHkRRitaMmahAdevastotram.itx

Category : shiva, bhAgavatapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 8/7/21-35||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

# પ્રજાપતિભિઃ કૃતં મહાદેવસ્તોત્રમ્

પ્રજાપતય ઊચુઃ ।
દેવદેવ મહાદેવ ભૂતાત્મન્ ભૂતભાવન ।
ત્રાહિ નઃ શરણાપન્નાંસ્ત્રૈલોક્યદહનાદ્વિષાત્ ॥ ૨૧॥

ત્વમેકઃ સર્વજગત ઈશ્વરો બન્ધમોક્ષયોઃ ।
તં ત્વામર્ચન્તિ કુશલાઃ પ્રપન્નાર્તિહરં ગુરુમ્ ॥ ૨૨॥

ગુણમય્યા સ્વશક્ત્યાસ્ય સર્ગસ્થિત્યપ્યયાન્ વિભો ।
ધત્સે યદા સ્વદૃગ્ભૂમન્ બ્રહ્મવિષ્ણુશિવાભિધામ્ ॥ ૨૩॥

ત્વં બ્રહ્મ પરમં ગુહ્યં સદસદ્ભાવભાવનઃ ।
નાનાશક્તિભિરાભાતસ્ત્વમાત્મા જગદીશ્વરઃ ॥ ૨૪॥

ત્વં શબ્દયોનિર્જગદાદિરાત્મા
પ્રાણેન્દ્રિયદ્રવ્યગુણસ્વભાવઃ ।
કાલઃ ક્રતુઃ સત્યમૃતં ચ ધર્મ-
સ્ત્વય્યક્ષરં યત્ત્રિવૃદામનન્તિ ॥ ૨૫॥

અગ્નિર્મુખં તેઽખિલદેવતાઽઽત્મા
ક્ષિતિં વિદુર્લોકભવાઙ્ઘ્રિપઙ્કજમ્ ।
કાલં ગતિં તેઽખિલદેવતાઽઽત્મનો
દિશશ્ચ કર્ણૌ રસનં જલેશમ્ ॥ ૨૬॥

નાભિર્નભસ્તે શ્વસનં નભસ્વાન્
સૂર્યશ્ચ ચક્ષૂંષિ જલં સ્મ રેતઃ ।
પરાવરાત્માશ્રયણં તવાત્મા
સોમો મનો દ્યૌર્ભગવન્ શિરસ્તે ॥ ૨૭॥

કુક્ષિઃ સમુદ્રા ગિરયોઽસ્થિસઙ્ઘા
રોમાણિ સર્વૌષધિવીરુધસ્તે ।

છન્દાંસિ સાક્ષાત્તવ સપ્તધાતવ-
સ્ત્રયીમયાત્મન્ હૃદયં સર્વધર્મઃ ॥ ૨૮॥

મુખાનિ પઞ્ચોપનિષદસ્તવેશ
યૈસ્ત્રિંશદષ્ટોત્તરમન્ત્રવર્ગઃ ।
યત્તચ્છિવાખ્યં પરમાર્થતત્ત્વં
દેવ સ્વયઞ્જ્યોતિરવસ્થિતિસ્તે ॥ ૨૯॥

છાયા ત્વધર્મોર્મિષુ યૈર્વિસર્ગો
નેત્રત્રયં સત્ત્વરજસ્તમાંસિ ।
સાઙ્ખ્યાત્મનઃ શાસ્ત્રકૃતસ્તવેક્ષા
છન્દોમયો દેવ ઋષિઃ પુરાણઃ ॥ ૩૦॥

ન તે ગિરિત્રાખિલલોકપાલ-
વિરિઞ્ચવૈકુણ્ઠસુરેન્દ્રગમ્યમ્ ।
જ્યોતિઃ પરં યત્ર રજસ્તમશ્ચ
સત્ત્વં ન યદ્બ્રહ્મ નિરસ્તભેદમ્ ॥ ૩૧॥

કામાધ્વરત્રિપુરકાલગરાદ્યનેક-
ભૂતદ્રુહઃ ક્ષપયતઃ સ્તુતયે ન તત્તે ।
યસ્ત્વન્તકાલ ઇદમાત્મકૃતં સ્વનેત્ર-
વહ્નિસ્ફુલિઙ્ગશિખયા ભસિતં ન વેદ ॥ ૩૨॥

યે ત્વાત્મરામગુરુભિર્હૃદિ ચિન્તિતાઙ્ઘ્રિ-
દ્વન્દ્વં ચરન્તમુમયા તપસાભિતપ્તમ્ ।
કત્થન્ત ઉગ્રપુરુષં નિરતં શ્મશાને
તે નૂનમૂતિમવિદંસ્તવ હાતલજ્જાઃ ॥ ૩૩॥

તત્તસ્ય તે સદસતોઃ પરતઃ પરસ્ય
નાઞ્જઃ સ્વરૂપગમને પ્રભવન્તિ ભૂમ્નઃ ।
બ્રહ્માદયઃ કિમુત સંસ્તવને વયં તુ
તત્સર્ગસર્ગવિષયા અપિ શક્તિમાત્રમ્ ॥ ૩૪॥

એતત્પરં પ્રપશ્યામો ન પરં તે મહેશ્વર ।
મૃડનાય હિ લોકસ્ય વ્યક્તિસ્તેઽવ્યક્તકર્મણઃ ॥ ૩૫॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે અષ્ટમસ્કન્ધે સપ્તમાધ્યાયાન્તર્ગતં

પ્રજાપતિભિઃ કૃતં મહાદેવસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૮/૭/૨૧-૩૫ ॥

bhAgavatapurANa . adhyAya 8/7/21-35..

Proofread by PSA Easwaran

*Prajapatibhih Kritam Mahadeva Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*